# स्वातंत्र्यवीर सावरकरांच्या स्वतंत्रता स्तोत्राचे संस्कृत रूपांतर

---

जयोऽस्तू ते श्रीमहन्मंगले शिवास्पदे शुभदे ।
स्वतंत्रते भगवति त्वामहं यशोयुतां वंदे ॥ धृ ॥
त्वं चैतन्यं भगवति मूर्तं राष्ट्रे संभाविते ।
त्वं सम्राज्ञी नीतिसंपदां स्वतंत्रते श्रीयुते॥ १ ॥
नभसि तमस्विनि परवशतायाः तेजस्विनि चरमे ।
भगवति विलससि निरुपमकांत्या स्वतंत्रते सुषमे ॥२॥
कपोलकुसुमे कुसुमकपोले शोभां वा धत्ते ।
यो हि रक्तिमा भगवति रूपं स्वतंत्रते तत् ते ॥३॥
त्वमेव तेजः सवितुर्जलधेर्गांभीर्यं प्रयते ।
ग्रहणावसरे हन्त तदेव स्वतंत्रते हीयते ॥ ४॥
मुक्तिर्मोक्षो भगवति रूपे तवैव वेदान्ते ।
ब्रह्मपदेन स्वतंत्रते त्वां योगिजना स्तुवते ॥ ५॥
यद् यदुदात्तं समुन्नतं वा यदुत्तमं मधुरम् ।
त्वयैव साकं तद् वै कुरुते भगवति संचारम् ॥ ६॥
अयि नीचरुधिररंजिते। सुजनपूजिते । श्रीस्वतंत्रते ॥ ७॥
मरणं तु तवार्थे जननं । त्वद्विरहितजननं मरणं ।
त्वं सकलचराचरशरणम् ॥ ८॥
आगमनं ते भारतवर्षे तनोतु शं वरदे ।
स्वतंत्रते भगवति त्वामहं यशोयुतां वन्दे ॥ ९ ॥

*****

वैद्य श्रीनिवास पु. हिर्लेकर

**(By: Vaidya Shriniwas P. Hirlekar)**